व्यासजी महाराज शुकदेवके प्रति किसी ब्राह्मण का वृत्तान्त कहतेहैं वह ब्राह्मण तीर्थोंको चलागया । गङ्गा, यमुना, सरस्वती, पवित्र वितस्ता और गोमती इन सब तीर्थोंमें स्नान करके और गयामें जायकर पिता पितामहको श्राद्धद्वारा तृप्त करताहुआ महेन्द्रपर्वतको चलागया ॥ ४ ॥

नृसिंहपुराणे त्रिंशेऽध्याये—

मू. ॥ नर्म्मदा सुरसा ऋषिकुल्या भीमरथी कृष्णावेणी ।
चन्द्रभागा ताम्रपर्णी इत्येताः सप्त नद्यः ॥ १२ ॥

भाषा ॥ नृसिंहपुराणके ३० अध्यायमें—

भरद्वाजके प्रति भूगोलवर्णन करतेहुए सूतजी भारतवर्षमें ७ नदियोंको कहतेहैं नर्म्मदा, सुरसा, ऋषिकुल्या, भीमरथी, कृष्णावेणी, चन्द्रभागा, ताम्रपर्णी यह सात नदियें भारतवर्षमें हैं ॥ १२ ॥

वायौ नृसिंहे ये श्लोकास्तीर्थमाहात्म्यबोधकाः ।
सप्तविंशे तदर्थस्तु दिवाकान्तेन वर्णितः ॥ २७ ॥

इति श्रीमत्सिन्ध्वादिसप्तनदमध्यवर्त्तिश्रीसाधुबेलातीर्थाधिष्ठातृयोगिराजपूज्यपादश्री १०८ मत्स्वामिबनखण्डिसिंहासनासीनश्रीमदुदासीनवर्य्यपरमहंसपरिव्राजकाचार्य्यश्री १०८ मत्स्वामिहरिनामदासाज्ञया दिवाकान्तेन विदुषा विनिर्म्मितायां संगृहीतसिन्ध्वादिसप्तनदमाहात्म्यभाषाभावार्थदीपिकायां सप्तविंशोऽध्यायः ॥ २७ ॥

ॐ श्रीत्रिवेणीघट्टाय नमः । ॐ श्रीयमुनाघट्टाय नमः ॥

हरिवंशपुराणे भविष्यपर्वणि षट्चत्वारिंशेऽध्याये—

चर्म्मण्वती च सिन्धुश्च तथा नदनदीपतिः ।
मेलकप्रभवश्चैव शोणो मणिनिभोदकः ॥ ४४ ॥

भाषा ॥ चर्म्मण्वती और सिन्धुनदी तैसे ही नद और नदियोंका पति अर्थात् समुद्र मेलक प्रभव (मेलकनामक पर्वतसे पैदाहुआ) मणिसदृश जलवाला शोणभद्र महानद ॥ ४४ ॥

गर्गसंहितायां विश्वजित्खण्डे पञ्चदशेऽध्याये—

मू. ॥ विपाशां स तदोत्तीर्य्य सैन्यैः शोणनदं नृप ।
कैकयानाययौ धन्वी प्रद्युम्नो यदुनन्दनः ॥ ३३ ॥

भाषा ॥ गर्गसंहिताके विश्वजित् खण्डमें १५ अध्यायमें—

नारदजी कहते हैं हे राजन् ! कृष्णचन्द्र महाराजका पुत्र तिस समय अपनी सेनाके समेत विपाशानदीको और शोणभद्रको यथाक्रमसे पार कर वह धनुर्धारी फिर कैकयदेशोंको आताभया ॥ ३३ ॥

अथ श्रीवृद्धसूर्य्यारुणसंवादे कर्मविपाकेऽष्टचत्वारिंशाधिकद्विशततमेऽध्याये—

मू. ॥ धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा ।
पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषलग्ने विधुस्थिते ।
श्यामाङ्गो धूसरस्तीक्ष्णः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुस्त्रीधनसंयुक्तो मित्रप्रियंवदान्वितः ।
मानभोगसुखाढ्यश्च मितदो लोभसंयुतः ॥ ९ ॥

अब श्रीवृद्धसूर्य्यारुणसंवादवाले कर्म्मविपाक ग्रन्थके २८४ अध्यायमें—

सूर्य्य भगवान् कहतेहैं हे अरुण ! धर्म्मसे स्वर्गरूप फलको भोगकर तथा पापसे नरक भोगकर अब वह पुरुष पूर्वपुण्यके प्रभावसे विपाशा नदीके समीप देशमें वृषराशिपर चन्द्रमाके आरूढ़ होनेपर ब्राह्मणवंशमें पैदा हुआहै वह श्यामाङ्ग है तथा

---

(१) इसका उपनाम सरस्वतीघाट है ॥ (२) अर्थात् दैत्येन्द्र हिरण्यकशिपुके क्रोधपूर्वक दौडनेसे इत्यादि नदियें भी क्षुब्ध होतीभई ॥ (३) यहांपर पूर्वपुण्यप्रभावेण इस पदसे ज्ञात होताहै कि बडे पुण्योंवाला पुरुष ही विपाशातीरमें जन्म लेसकताहै दूसरा नहीं ॥

धूसर वर्णवाला और तीक्ष्ण स्वभाववाला, तथा नौकरोंवाला और देशाटनमें तत्पर है ॥ ८ ॥ बहुत स्त्री धनादिकर संयुक्त, मित्र और प्रियंवदा (मधुरभाषणशीला स्त्री) से संयुक्त, मान भोग सुखसे भी युक्त और थोडा दानी तथा लोभी भी है ॥ ९ ॥

वृद्धश्रीसूर्य्यारुणसंवादे कर्मविपाके पञ्चनवत्यधिकत्रिशततमेऽध्याये—

मू. ॥ अन्यजन्मनि दानेन स जातः क्षत्रियोऽधमः ।
देशे विपाशानिकटे सप्तयोजनसम्मिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः ।
शूरो दाता प्रधानश्च देशे देशेऽतिविश्रुतः ॥ ६ ॥

भाषा ॥ वृद्ध श्रीसूर्य्यारुणसंवादवाले कर्मविपाकग्रन्थके ३९५ अध्यायमें—

सूर्य्य भगवान् अरुणसे कहतेहैं हे अरुण ! वह नीचपुरुष पूर्वजन्म कृत दानप्रभावसे विपाशानदीके समीप सात योजनपर क्षत्रियवंशमें उत्पन्न होताभया ॥ ५ ॥ सुन्दर रूपवाला उसका शरीर और श्रेष्ठ बुद्धिवाला तथा स्त्री पुत्र धनवाला होताभया । शूर वीर दानी मुख्य तथा देशदेशमें प्रसिद्धहुआ ॥ ६ ॥

वृद्धश्रीसूर्य्यारुणसंवादे कर्मविपाके ३२४ तमेऽध्याये—

मू. ॥ शतद्रोः पूर्वभागे तु दशयोजनसम्मिते ।
देशे जातः पूर्वपुण्यात्स शूद्रश्चात्र जन्मनि ॥ ८ ॥
सुकर्माऽमितदः साधू रक्तश्यामश्च मध्यमः ।
धनी सुखी पितृभक्तो नैकस्त्रीभोगसंयुतः ॥ ९ ॥

भाषा ॥ वृद्धश्री सूर्य्यारुणसंवादवाले कर्म्मविपाकग्रन्थके ८२४ अध्यायमें—

शतद्रुनदीसे दश योजनपरिमित पूर्वभागमें पूर्वपुण्यके प्रभावसे वह इस जन्ममें शूद्रवंशमें उत्पन्न हुआहै ॥ ८ ॥ सुन्दर कर्म करनेवाला बडा दानी साधुस्वभाव कुच्छ लालीयुक्त श्यामवर्णवाला तथा मध्यमपरिमाण देहवाला धनी सुखी तथा पितृभक्त और अनेक स्त्रियोंके भोगनेवाला हुआहै ॥ ९ ॥

हरिवंशे तथा गर्गसंहितायां तु ये भवाः ।
श्लोकाः कर्मविपाकेऽष्टाविंशेऽध्याये स्फुटीकृताः ॥ २८ ॥

इति श्रीमत्सिन्ध्वादिसप्तनदमध्यवर्त्तिश्रीसाधुबेलातीर्थाधिष्ठातृयोगिराजपूज्यपादश्री १०८ मत्स्वामिवनखण्डिसिंहासनासीनश्रीमदुदासीनवर्य्यपरमहंसपरिव्राजकाचार्य्यश्री १०८ मत्स्वामिहरिनामदासाज्ञया दिवाकान्तेन विदुषा विनिर्म्मितायां संगृहीतसिन्ध्वादिसप्तनदमाहात्म्यभाषाभावार्थदीपिकायामष्टाविंशोऽध्यायः ॥ २८ ॥

ॐ श्रीसप्तनदसिन्धुसरस्वत्यै नमः ॥

नारायणसरोवरमाहात्म्ये प्रथमेऽध्याये—

मू. ॥ सिन्धूदधिसमं तीर्थं न भूतं न भविष्यति ।
अमरा मृत्युमिच्छन्ति ह्यन्येषां तत्र का कथा ॥ १६ ॥
तीर्थं प्राप्य गयादिपुष्करकुरुक्षेत्राणि पुण्यं महत् ।
दानं भौमगजाश्वरत्नमतुलं पात्रं चतुर्वेदवित् ।
राहुग्रस्तदिवाकरे तदधिकं सिन्धोर्जलं सेव्यताम् ।
देवासुरनरभोगिनोऽस्य वरतां वक्तुं न शक्ता भुवि ॥ १७ ॥

भाषा ॥ नारायणसरोवर माहात्म्यवर्णन प्रथम अध्यायमें—

सिन्धुनदी और समुद्र इन दोनोंके सङ्गमके समान दूसरा कोई तीर्थ न हुआहै न होगा । देवतालोग भी वहांपर शरीर त्यागनेकी इच्छा रखतेहैं और प्राणियोंका कहना ही क्या है ॥ १६ ॥ गया पुष्कर कुरुक्षेत्रादि तीर्थोंको प्राप्त होकर जो महान् पुण्य प्राप्त होताहै पृथिवी, हस्ती, घोडा, सुवर्ण इनका दान चारवेद पढ़ेहुवे पात्रको देनेपर जो पुण्य होताहै राहुसे सूर्य्यके ग्रस जानेपर अर्थात् सूर्य्यग्रहण कालमें कुरुक्षेत्रादितीर्थपर पूर्वोक्त दानसे जो फल होताहै हे पुरुषो ! उससे भी अधिक पुण्यजनक सिन्धुनदीके जलको सेवन करो देव असुर नर नागादिक भी इसकी महिमा कथन करनेको पृथिवीपर कोई समर्थ नहीं ॥ १७ ॥

नारायणसरोवरमाहात्म्ये १ अध्याये—

मू. युधिष्ठिर उ. ॥ सिन्धोर्दर्शनमाहात्म्यं वर्णय त्वमतः परम् ।
तत्सर्वं श्रोतुमिच्छामि वद देवकिनन्दन ॥ २३ ॥
श्रीकृष्ण उ. ॥ दृष्ट्वा जन्मशतं पापं स्पृष्ट्वा जन्मशतत्रयम् ।
स्नात्वा जन्मसहस्राणां हन्ति सिन्धोर्महज्जलम् ॥ २४ ॥

भाषा ॥ नारायणसरोवर माहात्म्यनिरूपण प्रथम अध्यायमें—

युधिष्ठिर श्रीकृष्णमहाराजसे पूछतेहैं कि हे देवकीनन्दन ! इससे अनन्तर आप सिन्धुनदीके दर्शन करनेके महत्त्वको मुझे कथन करें और मैं उसको सम्पूर्णतया श्रवण करनेकी इच्छा रखता हूं ॥ २३ ॥ श्रीकृष्णमहाराज उत्तर देतेहैं कि राजन् ! दर्शन करनेसे सौ जन्मके पापको, स्पर्श करनेसे तीनसौ जन्मके पापको, तथा स्नान करनेसे हजार जन्मके पापको सिन्धुनदीका उत्तमजल विनाश करताहै ॥ २४ ॥

नारायणसरोवरमाहात्म्ये द्वितीयेऽध्याये—

मू. ॥ सू. उ. ॥ ते देशास्ते जनपदास्ते शैलास्तेऽपि वाश्रमाः ।
पुण्या सिन्धुनदी येषां मध्ये याति सरिद्वरा ॥ २२ ॥
तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं यां लभते जन्तुस्सिन्धुं संसेव्य तां लभेत् ॥ २३ ॥
स्नातानां शुचिभिस्तोयैः सैन्धवैर्नियतात्मनाम् ।
पुष्टिर्भवति यत्पुंसां न सा क्रतुशतैरपि ॥ २४ ॥
अपहृत्य तमस्तीव्रं यथादूदयते रविः ।
तथाऽपहृत्य पापानां भाति सिन्धुर्जलाप्लुता ॥ २५ ॥
अग्निं प्राप्य यथा राजन् तृणराशिर्विनश्यति ।
तथा सिन्धौ मज्जितानां सर्वपापं प्रणश्यति ॥ २६ ॥

भाषा ॥ नारायणसरोवर माहात्म्यके २ अध्यायमें—

सूतजी कहतेहैं वह देश तथा वह जनपद वही शैल और वही आश्रम पवित्रहैं जिनके बीचमें होकर नदियोंमें श्रेष्ठ सिन्धुनदी जातीहै ॥ २२ ॥ तपसे ब्रह्मचर्य्यसे यज्ञोंसे और संन्याससे जिस गतिको जीव प्राप्त होताहै सिन्धुनदीका सेवन करनेसे उस गतिको प्राप्त होताहै ॥ २३ ॥ सिन्धुनदके पवित्र जलोंसे स्नान किये हुये नियतात्म पुरुषोंको जो पुष्टि होतीहै वह सौ यज्ञसे भी नहीं हो सकती ॥ २४ ॥ जैसे तीव्रतमको दूरकरके सूर्य्य उदय होताहै तैसे पापोंको नाशकर जलोंसे व्याप्त सिन्धुनदी प्रकाशमानहै ॥ २५ ॥ सूतजी कहतेहैं हे राजन् ! अग्निको प्राप्त होकर जैसे तृणोंका ढेर भस्म होजाताहै तैसे ही सिन्धुनदमें स्नान करनेवालोंके सर्वपाप नाश होते हैं ॥ २६ ॥

नारायणसरोवरमाहात्म्ये द्वितीयेऽध्याये—

मू. ॥ चान्द्रायणसहस्रन्तु प्रायश्चित्तङ्करोति यः ।
पिबेद्यश्चापि सिन्ध्वम्भस्समौ स्यातां हि तावुभौ ॥ २७ ॥
तिष्ठेद्युगसहस्रं तु पादेनैकेन यः पुमान् ।
धत्ते सकृत्पदं सिन्धौ यो नरः स विशिष्यते ॥ २८ ॥
लम्बेदधः शिरो यस्तु वर्षाणामयुतो नरः ।
मांसमेकन्तु सिन्ध्वम्भस्सेवते सममेव तत् ॥ ३० ॥

भूतानामिह सर्वेषां दुःखाभिहतचेतसाम् ।
गतिमन्विच्छतां पुंसां नास्ति सिन्धुसमा गतिः ॥ ३१ ॥
सिन्धुतीरसमुद्भूतां मृदं मूर्ध्नि बिभर्त्ति यः ।
बिभर्त्ति रूपं शिवस्य तमोनाशाय कश्चन ॥ ३२ ॥
सप्त परांश्च पूर्वान् यः पितॄनुद्धर्त्तुमिच्छति ।
स नरस्तारयेत्सिन्धुं दृष्ट्वा स्पृष्ट्वा च ग्राह्य वा ॥ ३३ ॥
दर्शनात्स्पर्शनात्पानात्तथासिन्धोश्च कीर्त्तनात् ।
पुनाति पतितान् पापान् पुरुषांस्तु सहस्रशः ॥ ३४ ॥

भाषा ॥ नारायणसरोवर माहात्म्यके २ अध्यायमें—

एक पुरुष हजार चान्द्रायण व्रतरूप प्रायश्चित्त करताहै और दूसरा पुरुष फक्त सिन्धुनदीका जलमात्र पीताहै यह दोनों समान फलभागी होतेहैं ॥ २७ ॥ एक पुरुष हजार युगपर्य्यन्त एकचरणके भार खडारहै उसकी अपेक्षा वह पुरुष श्रेष्ठहै जो सिन्धुनदमें एकवार अपना चरण रखताहै ॥ २८ ॥ जो पुरुष दश हजार वर्षतक नीचे शिर ऊपर पैर कियेहुए लटकताहै और दूसरा पुरुष एक मासतक सिन्धुनदके जलका सेवन करताहै इन दोनोंको फल तुल्य होताहै ॥३०॥ इस संसारमें दुःखसे व्याकुल चित्तवाले समस्त शरणार्थी प्राणियोंको सिन्धुनदके समान दूसरी गति (आश्रय) नहीं ॥ ३१ सिन्धुनदके किनारेकी मृत्तिकाको जो पुरुष मस्तकमें लगाता है वह शिवके रूपक धारण करताहै तम (अज्ञान) के नाशके वास्ते ॥ ३२ ॥ जो पुरुष सात पीढी पूर्व तथा सात अग्रिम पितरोंके उद्धारकी इच्छा करताहै वह सिन्धुनदको देखके तथा स्पर्श करके तथा ग्रहण (पान) करके उद्धार करे ॥ ३३ ॥ सिन्धुनदीका दर्शन, स्पर्श, पान तथा हे सिन्धो ! हे सिन्धो ! ऐसा कीर्त्तन करने वाले पतित हुवे हुवे हजारों पापी पुरुषोंको पवित्र करतीहै ॥ ३४ ॥

नारायणसरोवरमाहात्म्ये द्वितीयेऽध्याये—

मू. ॥ य इच्छेत्सफलं जन्म जीवितं श्रुतमेव च ।
सिन्धुस्तारयते नृणामुभौ वंशौ विशेषतः ॥ ३५ ॥
त्रिकालदर्शिभिर्नित्यं सेविता यापि सत्तमैः ।
देवैः सेन्द्रैश्च के सिन्धुं नोपसेवन्ति मानवाः ॥ ३६ ॥
वानप्रस्थैश्च यतिभिर्गृहस्थैर्ब्रह्मचारिभिः ।
विद्वद्भिः सेवितां सिन्धुं पुमान् को न समाश्रयेत् ॥ ३७ ॥

मनोवाक्कायजैर्ग्रस्तः पापैर्बहुविधैरपि ।
वीक्ष्य सिन्धुं भवेत्पूतः पुरुषो नात्र संशयः ॥ ३८ ॥
उत्क्रामद्भिः प्राणिवर्गैर्म्रियते श्रद्धयान्वितैः ।
ध्यायिभिर्मनसा सिन्धुं तेऽपि यान्ति पराङ्गतिम् ॥ ३९ ॥
यावदस्थि मनुष्याणां सिन्धुतोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ४० ॥
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चात्सिन्धुं निषेवन्ते तेऽपि यान्ति पराङ्गतिम् ॥ ४१ ॥

भाषा ॥ नारायणसरोवर माहात्म्यके २ अध्यायमें—

जो मनुष्य अपने जन्म तथा जीवन और सच्छास्त्रके श्रवणके सफल होनेकी इच्छा रखता होवे उस पुरुषके मातृकुल तथा पितृकुल दोनोंको सेवन कियाहुआ सिन्धुनद उद्धार करताहै ॥ ३५ ॥ जो सिन्धुनदी, दर्शनेच्छु श्रेष्ठ इन्द्रादिदेवतोंसे भी प्रतिदिन तीनों काल (प्रातः सायं मध्याह्न) सेवन करीजातीहै तब ऐसे कौन पुरुष होंगे जो उसका सेवन नहीं करेंगे ॥३६॥ ब्रह्मचारि, गृहस्थ, वानप्रस्थ, संन्यासी और विद्वान् इन सबसे सेवन करीहुई सिन्धुनदीको कौन पुरुष नहीं आश्रयण करेगा ॥ ३७ ॥ कायिक वाचिक मानसिक बहुत प्रकारके पापोंसे ग्रसा हुआ पुरुष सिन्धुनदीके दर्शनमात्रसे पवित्र होजाताहै इसमें कोई संशय नहीं ॥ ३८ ॥ मरनेके वखतपर जो प्राणिवर्ग बडी श्रद्धासे सिन्धुनदका ध्यान करते हुवे मरतेहैं वेभी परमगतिको प्राप्त होतेहैं ॥ ३९ ॥ जबतक मनुष्योंकी अस्थि (हड्डी) सिन्धुनदके जलमें रहतीहै उतने हजार वर्ष वह पुरुष स्वर्गलोकमें पूजित होताहै ॥ ४० ॥ प्रथम अवस्था (बाल युवा) पापकर्म्म करके जो पुरुष पीछेसे (वृद्धावस्थामें) सिन्धुनदका सेवन करतेहैं वे भी परमगतिको प्राप्त होतेहैं ॥ ४१ ॥

नारायणसरोवरमहात्म्ये द्वितीयेऽध्याये—

मू. ॥ सिन्धोर्जलोर्मिभिर्धौतः पुरुषः शुद्धमानसः ।
स्पृशति चान्यं पापिष्ठं सद्य एव विशुद्ध्यति ॥ ४२ ॥
अन्धाः क्लीबा जडा व्यङ्गाः पतिता रोगिणोऽन्त्यजाः ।
सिन्धुं संसेव्य पुरुषाः सुरैर्गच्छन्ति तुल्यताम् ॥ ४३ ॥
कामयन्ति पितरः पुंसां सर्वे हि नरपुङ्गव ।
मद्वंश्योऽपि धन्यात्मा कदा सिन्धुं गमिष्यति ॥ ४६ ॥

सिन्धूदकैर्यदा मर्त्यः स्वपितॄन् तर्पयिष्यति ।
तदा तज्जन्म सफलं स धन्यः पुरुषोत्तमः ॥ ४७ ॥

भाषा ॥ नारायणसरोवर माहात्म्यके २ अध्यायमें—

सिन्धुनदकी जलोर्मियों (लहरों) से धोयाहुआ शुद्ध मनवाला पुरुष यदि दूसरे किसी पापिष्ठ पुरुषको स्पर्श करताहै तब वह भी शीघ्र ही विशुद्ध होजाताहै ॥ ४२ ॥ अन्ध, क्लीव (नपुंसक) जड, व्यङ्ग, (अङ्गहीन) पतित, (जातिच्युत अर्थात् पापी) रोगी, चाण्डाल इत्यादि पुरुष भी सिन्धुनदका भली प्रकार सेवन करनेसे देवतोंके तुल्य होजातेहैं ॥ ४३ ॥ श्रीकृष्णमहाराज कहतेहैं हे पुरुषोंमें श्रेष्ठ युधिष्ठिर ! पुरुषोंके समस्त पितर ऐसी इच्छा करतेहैं कि मेरी वंशमें होनेवाला कोई धन्यवाद योग्य पुरुष कभी सिन्धुनदपर जायगा ॥ ४६ ॥ सिन्धुनदके जलोंसे पुरुष जब अपने पितरोंको तृप्त करेगा तबही उसका जन्म सफल है और वह पुरुषोंमें उत्तमपुरुष धन्यवादके योग्यहै ॥ ४७ ॥

नारायणसरोवरमाहात्म्ये तृतीयेऽध्याये—

मू. ॥ यु० उ० ॥ कृष्ण कृष्ण महायोगिन् वद नो वदतां वर ।
कस्याऽस्थिगतं सिन्धुं स्वर्गलोके च को गतः ॥ १ ॥
श्रीकृ० उ० ॥ शृणु त्वञ्च महाबाहो इतिहासं पुरातनम् ।
कान्यकुब्जेश्वरो राजा मृगयाङ्गन्तुमुद्यतः ॥ २ ॥
सकुटुम्बः ससैन्यश्च चचार गहने वने ।
महादंष्ट्रा महावक्रा पल्वलादुत्थिता मृगी ॥ ३ ॥
राजानं कुपितं दृष्ट्वा पलायनपराऽभवत् ।
वाराहीकौतुकं दृष्ट्वा राजापि तरसान्वितः ॥ ४ ॥
तामनु वायुवेगेन प्राप्तः पश्चिमसागरम् ।
तत्र सरोवरे राजा त्वेकाकी हयमाश्रितः ॥ ५ ॥
इषुं निषङ्गादुद्धृत्य मृगीं लक्ष्यीचकार ह ।
तच्छराग्राहता कोला पतिता पृथिवीतले ॥ ६ ॥
पञ्चत्वममम्मत्तत्र स्मृत्वा राजानमागतम् ।
नृपस्य ध्यानमात्रेण राजपुत्रीत्वमागता ॥ ७ ॥

मृगी कौतुकरूपेण सञ्जाता राजवेश्मनि ।
कण्ठादूर्ध्वं शिरोमात्रं मृगाकारसमन्वितम् ॥ ८ ॥
गलावधि मनुष्याङ्गी रूपशीलगुणान्विता ।
एवं कौतुकरूपेण ववृधे राजवेश्मनि ॥ ९ ॥
कान्यकुब्जेश्वरो राजा चिन्ताविष्टो बभूव ह ॥

नारायणसरोवर माहात्म्यके ३ अध्यायमें—

राजा युधिष्ठिर श्रीकृष्णमहाराजसे पूछते हैं कि हे कथन करनेवालोंमें श्रेष्ठ ! योगिराज श्रीकृष्णजी ! मेरे प्रति यह बात कथन करो कि किसकी अस्थि सिन्धुनदमें जानेसे कौन सुखको प्राप्त हुआ ॥१॥ श्रीकृष्णमहाराज कहतेहैं हे महाबाहो ! तू पुरातन इतिहास श्रवण कर । राजा कान्यकुब्जेश्वर शिकार खेलनेके लिये जानेको तैयार होताभया ॥२॥ अपने पुत्रादि कुटुम्ब तथा सेनाके सहित गहनवनमें विचरता भया एक अल्पजलाशयसे बड़े दाढ़वाली तथा बड़ी वक्रवराही (सूअरी) निकसी ॥ ३ ॥ राजाको क्रोध हुवे देख वह दौडने लगी । उस वाराहीके कौतुकको देखकर राजा भी बडी जलदीसे ॥ ४ ॥ उसके पीछे पीछे वायुवेगसे पश्चिम समुद्रको प्राप्त होताभया । तहांपर नारायणसरोवर पर राजा एकला ही घोडेपर सवार था ॥ ५ ॥ निषङ्ग (भत्थे) से बाण निकालकर उस वाराहीको लक्ष्य (निशाना) बनाता भया । राजाके बाणसे आहत हुई हुई वह सूअरी जमीनपर गिरपडी ॥ ६ ॥ और वहांपर ही आयेहुवे राजाका स्मरण करके वह मृत्युको प्राप्त होगई । राजाके ध्यानमात्रसे वह उसी राजाके घरमें पुत्रीरूप होकर पैदा हुई ॥ ७ ॥ वह मृगी बडे आश्चर्य्यरूपको धारण करके राजगृहमें उत्पन्न भई गलसे ऊपर शिर मात्र उसका मृगाकार (जैसापूर्वजन्ममें था) वैसा ही होताभया ॥ ८ ॥ और गलपर्य्यन्त नीचेका भाग मनुष्य जैसे अङ्गोंवाला होताभया रूप, शील तथा गुणोंसे युक्त होतीभई । इसी रीतिसे बडे कौतुक (विस्मयजनक) रूपसे राजगृहमें वह कन्या बढ़नेलगी ॥ ९ ॥ और अपनी लडकीकी ऐसी विचित्र आकृति देखकर राजा कान्यकुब्जेश्वर भी चिन्तासे व्याप्त होताभया ॥

नारायणसरोवरमाहात्म्ये तृतीयेऽध्याये—

मू. ॥ एतस्मिन्नन्तरे भूप स्वेच्छया कपिलो मुनिः ॥ १० ॥
आविर्बभूव सिद्धार्थो जनानां शुभकार्य्यकृत् ।
मुनिमागतमाज्ञाय सम्यक् पूजाश्चकार ह ॥ ११ ॥
राजा संहृष्टमनसा मुनिराजं वचोऽब्रवीत् ।
मम गेहे सुता जाता महाविस्मयकारिणी ॥ १२ ॥
अत्राश्चर्य्यमये कार्य्ये त्वमेव शरणं मम ।

कार्दमेयो महाराज ध्यानस्तिमितलोचनः ॥ १३ ॥
श्रीक० उ० ॥ शृणु राजन् कथामेतां तव कर्मानुवर्त्तिनीम् ।
कृतकर्म्मफलं भुङ्क्ष्व इह लोके परत्र च ॥ १४ ॥
एकदा मृगयां कर्त्तुं नारायणसरस्तटे ।
एकाकी हयमारुह्य सम्प्राप्तो गहने वने ॥ १५ ॥
तत्र दृष्ट्वा मृगी रम्या बाणलक्ष्यीकृता त्वया ।
सा बाणेनाहता तत्र पतिता वल्लिजालके ॥ १६ ॥
तत्र पञ्चत्वमापन्ना स्मरन् रूपञ्च तावकम् ।
तव स्मरणमात्रेण पुत्री जाता गृहे तव ॥ १७ ॥
जाता कौतुकरूपेण शृणु कौतुककारणम् ॥

भाषा ॥ नारायणसरोवर माहात्म्यके ३ अध्यायमें—

श्रीकृष्णमहाराज कहतेहैं हे राजन्! इससे अनन्तर फिर अपनी इच्छासे विचरता हुआ कपिलमुनि आयकर प्रकट हुआ जो कपिलमुनि सिद्धार्थ (सिद्ध होचुकाहै जीवन्मुक्तिरूप प्रयोजन जिसका) और पुरुषोंके शुभकार्य्य करनेवाला है, आये हुए मुनिको जानकर राजा भी भलीप्रकार पूजन करताभया ॥१०॥११॥ राजा प्रसन्न मनसे मुनिराजके प्रति कहता भया हे मुनिराज! मेरे घरमें ऐसी पुत्री उत्पन्न हुई है जो अत्यन्त विस्मय जनकहै ॥ १२ ॥ इस मेरे आश्चर्य्यमय कार्य्यमें आप ही शरणहैं। हे युधिष्ठिर! ऐसा सुनकर कर्दममुनिका पुत्र (कपिल) ध्यानमें निमीलित नेत्रवाला हुआ हुआ कहता भया ॥ १३ ॥ हे राजन्! तेरे कर्म्मानुसारिणी इस कथाको तू श्रवण कर। अपने कियेहुवे कर्म्मका फल इसलोकमें तथा परलोकमें भोग ॥ १४ ॥ एक समयमें शिकार करनेको नारायणसरोवरके पास अकेला घोडेपर आरूढ़ होकर बडे सघनवनमें तू गया था ॥ १५ ॥ तहांपर एक सुन्दर मृगी देखकर तैने अपने बाणका लक्ष्य (निशाना) बनाया। वह वहांपर बाणसे आहत हुई वल्लिजालमें फसगई ॥ १६ ॥ तहांपर तेरे रूपको स्मरण करतीहुई मृत्युको प्राप्त होगई। तेरे स्मरणमात्रसे वह संस्कारवश तेरे ही गृहमें पुत्रीरूपसे उत्पन्न हुई ॥ १७ ॥ और जो वह विस्मयजनक रूपसे उत्पन्न हुई है उस कौतुकका कारण श्रवणकर ॥

नारायणसरोवरमाहात्म्ये तृतीयेऽध्याये—

मू. ॥ कबन्धस्तु तदीयो वै पतितः सिन्धुसागरे ॥ १८ ॥
शिरोऽस्थिसंस्थितं वल्यां तस्मात्तद्रूपकौतुकम् ।
निक्षिप तच्छिरः शीघ्रं सिन्धुनद्या जलेऽधुना ॥ १९ ॥

क्षिप्तमात्रेण सा राजन् भविष्यति शुभानना ।
एवमुक्त्वा मुनिश्रेष्ठस्तत्रैवान्तरधीयत ॥ २० ॥

तस्मिन्नवसरे राजाप्येवं प्रोवाच सेवकान् ।
शीघ्रं गच्छन्तु भो दूता धावन्तु हि यतस्ततः ॥ २१ ॥

शिरोऽन्वेषणं कुर्य्याद्यस्तस्मै दास्यामि वाञ्छितम् ।
इति तस्य वचः श्रुत्वा ययुस्सर्वे तदाज्ञया ॥ २२ ॥

ततो मृगशिरस्ते च चिक्षिपुः सिन्धुसागरे ।
क्षिप्तमात्रेण कौन्तेय शीघ्रं शशिमुखी वृता ॥ २३ ॥

तच्छ्रुत्वा तु महोत्साहो राजा संहृष्टमानसः ।
ब्राह्मणान्भोजयामास सिन्धुनद्यास्तटे तदा ॥ २४ ॥

ददौ तेभ्यो महादानं यज्ञतुल्यञ्चकार ह ।
तस्मात्त्वमपि राजेन्द्र श्रद्धया परयान्वितः ॥ २५ ॥

सिन्धुसेवनमात्रेण श्रेयः शान्तिमुपैष्यसि ।
माहात्म्यश्रवणाच्चापि गोसहस्रफलं भवेत् ॥ २६ ॥

भाषा ॥ नारायणसरोवर माहात्म्यके ३ अध्यायमें—

उस मृगीका कबन्ध (गलपर्य्यन्त शरीरका नीचेभाग) सिन्धुनदीसमुद्रके सङ्गममें जा गिरा । शिरका अस्थिपञ्जर उसी वल्लीमें फसा रहगया इसीलिये सिन्धुजलस्पर्शके प्रभावसे उस कन्याका कबन्ध मात्र मानुषीशरीर होगया और शिर जैसेका तैसा रहगया इसलिये इसी समय उसके शिरको भी तलाश करके सिन्धुनदमें फेकवा दे ॥१८॥१९॥ हे राजन्! ऐसा करनेसे उसका मुख चन्द्रमा जैसा सुन्दर होजावेगा । इस तरह कथन कर कपिलमुनि उसी जगह अन्तरधान (गुप्त-अदृश्य) होगया ॥ २० ॥ तब राजा भी अपने सेवकोंको ऐसा कहता भया । हे दूतो ! शीघ्र जावो और इधर उधर दौडो ॥ २१ ॥ जो उस मृगीके शिरकी खोजकरेगा उसको मैं वाञ्छित द्रव्य देवूंगा ऐसा राजाका वचन श्रवण कर तिसकी आज्ञासे सब जातेभये ॥२२॥ तदनन्तर वे दूतलोग शिरको खोजकर सिन्धुसागरमें फेंक देतेभये । श्रीकृष्णजी कहतेहैं हे कुन्तीपुत्र युधिष्ठिर ! तिस शिरको सिन्धुनदीके जलमें फेंकने मात्रसे वह कन्या चन्द्रवदनी होगई ॥ २३ ॥ इस बातको श्रवणकर उस कन्याका पिता राजा कान्यकुब्जेश्वर भी बडे उत्साहयुक्त और प्रसन्नचित्त हुआ हुआ तब सिन्धुनदके किनारे ब्राह्मणोंको भोजन

खिलाता भया ॥ २४ ॥ और तिन ब्राह्मणोंको बडा दान दिया मानो यज्ञ ही करताभया। इसलिये हे युधिष्ठिर ! तू भी बडी श्रद्धायुक्त ॥ २५ ॥ सिन्धुनदके सेवन मात्रसे कल्याण और शान्तिको प्राप्त होवेगा। और इसी सिन्धुनदके माहात्म्य श्रवण मात्रसे ही हजार गोदानके फलको प्राप्त होताहै ॥ २६ ॥

नारायणसरोवर्य्यमाहात्म्यान्तर्गतास्तु ये।
श्लोकाः सिन्धुनदस्यात्र माहात्म्यप्रतिबोधकाः ॥ १ ॥

ऊनत्रिंशत्तमेऽध्याये तदर्थस्तु स्फुटीकृतः।
दिवाकान्तेन विदुषा नदः सिन्धुः प्रसीदतु ॥ २ ॥

त्रिमुनिरन्ध्रहिमांशुसमेऽब्दके त्वसितपौषगते हरिवासरे।
गुरुयुतेऽस्य समाप्तिरकारि भो यदुपतेरनुगेन मया बुधाः ॥ ३ ॥

इति श्रीमत्सिन्ध्वादिसप्तनदमध्यवर्त्तिश्रीसाधुबेलातीर्थाधिष्ठातृयोगिराजपूज्यपादश्री १०८ मत्स्वामिबनखण्डिसिंहासनासीनश्रीमदुदासीनवर्य्यपरमहंसपरिव्राजकाचार्य्यश्री १०८ मत्स्वामिहरिनामदासाज्ञया मिथिलावास्तव्यपं० श्रीविष्णुप्रसादात्मजदिवाकान्तेन विदुषा विनिर्म्मितायां संगृहीतसिन्ध्वादिसप्तनदमाहात्म्यभाषाभावार्थदीपिकायामेकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

समाप्तं चेदं सप्तनदसिन्धुमाहात्म्यम्।





अथ श्रीसिन्धुगङ्गालहरी प्रारभ्यते ॥

ॐनमः श्रीसिन्धुगङ्गायै ॥

गजास्ये विद्वत्ता पितरि विषमत्तेऽपि महति गुरौ यस्माद्वासोरहिततनुतायामपि हरे । नवा भारो लम्बोदरभरणकार्येऽमरगवि स ते श्लाघ्यो गङ्गे शिवशिरसि सञ्चारमहिमा ॥ १ ॥ सुधांशौ सन्तप्ते हरनयनदावानलशिखावलीभिः श्रीशम्भावपि गरलसम्भोगजनितात् । महातापान्मुग्धे प्रचुरदयगङ्गे विकिरसि जटाजूटाच्छम्भोरमृतसुकणान् सिन्धुसुभगे ॥ २ ॥ अपर्णा यज्जाता तदचलजनिर्देवनदि ते जगद्वन्द्या तुल्या पुनरसि परं सोदरभृतौ । सदोद्युक्ता काश्यां भुवनवसतान्तापशमनी त्वमास्से तच्छम्भुर्वहति शिरसा त्वां नूच शिवाम् ॥ ३ ॥ त्वदीयेक्षामात्रात्कलुषनिचयं याति विलयं नराणां संस्मृत्या नगवरसुताया जपविधेः । समर्च्चातोऽप्येतद्विषममुभयोर्वीक्ष्य परमं महत्त्वं तच्छम्भुर्वहति शिरसा त्वां नच शिवाम् ॥ ४ ॥ महापापैर्युक्तान्विविधभवरोगैः प्रमथितान् प्रमादादुन्मत्तान्मनुजनिवहान् सिन्धुसुभगे । स्वपुत्रान्संवीक्ष्य श्रितकृतदये शम्भुशिरसः समाक्षी त्वं भूमाववतरणमेतत् कृतवती ॥ ५ ॥ शिरश्छेदाद्धातुरजनि गिरिजेशेऽघपटली तदुत्तापाच्छम्भुर्गरलमपिबत्सुष्ठु सपदि । गले लग्नं नान्तर्गतमिति समालोच्य शिरसा तवाम्बालम्बोऽयं कृत इति मदीयोऽस्ति समयः ॥ ६ ॥ कपालित्वे वासोविरहिततनुत्वे वृषगतौ सदा भिक्षाशित्वे गरलसमशित्वेपि दधतः। द्विजिह्वानुत्कृष्टान् हिमगिरिसुताभर्तुरयि तज्जगच्छाघ्यं रूपं जननि खलु त्वत्सङ्गतिफलम् ॥ ७ ॥ महाहेराक्रान्तौ हरिचरणसंलग्नगरलं क्रमेण व्यासक्तं तदवयवमात्रे यदि तदा । विमुग्धे श्रीविष्णावनरहितं स्याज्जगदतो दयार्द्रा पाथोभिः क्षलयसि तदङ्गी सुरनदि ॥ ८ ॥ सुधासौन्दर्य्यं ते वपुषि कविवर्य्यैरुपमितं तदेतत्सम्मोहाज्जननि यदि सिन्धो सुरनदि । न चेदेषा संज्ञाऽसुरगुरुगता स्यात्कथमिह कवीति प्रस्फूर्ज्जद्दृदययुगनेत्रेषु कविषु ॥ ९ ॥ शुभे मातस्सिन्धो कृतकलुषकार्पण्यदलिनि अघव्रातान्दग्धुं समुचितपटुत्वं धृतवती । तवेयं संशक्तिर्ज्जलमयतनोर्विस्मयपदा इति स्मारंस्मारं भ्रमति हृदयं ते

पदयुगे ॥ १० ॥ अघौघप्रध्वंसप्रविततमहिम्नां परगतं त्वदीयं माहात्म्यं जननि शुभसिन्धो सुकरुणे । इयं स्मारंस्मारमतनुकलुषव्रातविषया लयं याता भीति-र्हृदयगततापोऽपि दलितः ॥ ११ ॥ सुधासौन्दर्य्यं ते हिमगतसुशैत्यं च चलतां रमाया धावल्यं हिमकरगतं सौष्ठवमपि । अधःकुर्वन् कुर्वन् निखिलसरितां दैर्घ्यप्रभृति प्रवाहो नीराणामयि विजयतेऽयं त्रिभुवने ॥ १२ ॥ स्मृतौ चेदा-यातं झटिति गततापं च हृदयं विधत्ते व्याधुन्वत्कलुषमखिलं देवसुनुते । नितान्तं तान्तं तज्जननि सुभगं नाम विमलं मदीयास्ये शास्ये वसतु सततं सिन्धुरिति ते ॥ १३ ॥ सदा ध्यायंध्यायञ्जननि महिमानं तव जलं शुभं स्वादं स्वादं विमलतरगङ्केति सुभगम् । पदं स्मारंस्मारं त्रिदशमुनिवृन्दार्चितपदे जनुर्मे प्रद्योतद्वयमिदमनित्यं च व्रजतात् ॥ १४ ॥ कृपापारावारे भवजलधितारे सुकरुणे तमोभङ्गे गङ्गे तव तटनिकुञ्जे प्रवसताम् । अपि स्यां काकानामहमपि त्वदीयाम्बु पिबतां समुत्पन्नो योनिष्वखिलभवतापार्तिदलिनि ॥ १५ ॥ भवा-नीपादाब्जस्मरणपरिहार्य्यत्वमगतं रमाधीशाभ्यर्चाकृतिरपि तथा श्रीपशुपतेः । सुभक्तिर्नार्प्यर्चा यमिह कलुषं नाशयति नो स तं दूरीकर्त्तुं जयति जलपुञ्जो जननि ते ॥ १६ ॥ पृथिव्यां ते सिन्धो प्रथितयशसां पूर्वजनृणां परे ब्रह्मण्यद्धा कृतसुमनसां शान्तिमवताम् । मनोलास्यं वास्यं विमलजलकाश्यं तटमिदं त्रिलोक्यां सर्वस्माद्भवदृजिनभङ्गाद्विजयते ॥ १७ ॥ कवीनां प्रौढानां प्रथित-वचसां वाकूप्रवहणं समारुढं शुद्धं निजमहिमबुद्धं जननि ते । शुभे मातः ! सिन्धो स्तवनविषये प्रोद्गतत्रपमभूत्तन्मे धार्ष्ट्यं शिशुरिति धिया क्षाम्यमनिशम् ॥ १८ ॥ नवा योगापेक्षा नच खलु प्रतीक्षा वरगुरोर्नवा दीक्षावीक्षा नच जपसमीक्षा सुरनदि । त्वदीये नैर्मल्यं गतवति तटे पुण्यनिचयैः शुभे नो यज्ञेष्टिर्भवति भवतां सिन्धुसुभगे ॥ १९ ॥ कृतान्तः संभ्रान्तः प्रति-दिनमुदारं वच इदं स्वदूतेभ्यो भूयः कथयति प्रकाशं नतशिराः । न यूयं गन्तारो भवत खलु भ्रान्त्यापि वसतां शुभे सिन्धोस्तीरे त्वधिसविधमा-धिप्रसितगुः ॥ २० ॥ सुधांशोः संस्फूर्ज्जत्किरणनिचयैः स्फूर्ज्जिततमे इतश्चेत-स्तिष्ठद्भतभयमृगे कूजितकले । पतङ्गानां व्राते मृदुतमतटे सैकतसिते सुधौते वीचिभ्यस्तव जनने चेतो वसतु नः ॥ २१ ॥ किमन्यैः संवासैर्विविधजपयज्ञैश्च तपसा व्रतैः किंवा मातर्मधुमथनपादाब्जयुगले । समर्चाभिर्दानैर्वसुविधसमा-धानकरणैस्त्वदीये संवासो यदि जननि तीरे भवभृताम् ॥ २२ ॥ परं ते

RESEARCH INSTITUTE.
14, R.H. ROAD, MADRAS-4

माहात्म्यं जननि वचसां नैव विषयं श्रुतिस्संमुग्धेयं नच नच पदं केवलमिह्नि। वदन्ती श्रीशम्भुमुरारिपुरथो नाभिजनितः सुरेशो वा पूज्यो गुरुरपि विदुर्नैव सुभगे ॥ २३ ॥ प्रपन्नान् पापौघैर्मलिनहृदयांस्त्वं सुकरुणे पुनाना श्रीसिन्धोऽवतरसि नचेदत्र भुवने। गतिः का नो मातः कलुषभरभाण्डोदरहृदां निजौदार्य्यां चिन्तां सततमपि गङ्गे कृतवताम् ॥ २४ ॥ भवोत्तापेऽगाधे पतितमनुजो वाऽघवलितः, शुभे ब्राह्मे काले प्रतिदिनमनन्येन मनसा। स्तुवन् भोगान् भुक्त्वा जननि सकलांस्त्वामिह तनोर्विनाशे सम्प्राप्ते व्रजति नियतं स्वर्गपदवीम् ॥ २५ ॥ महारावैर्युक्ता जननि यदि वीचिर्नयनगा त्वदीया सद्भक्त्या भवति खलु गीतं तव यशः। पयः पीतं नीतं श्रवणपुटके कीर्तिनिचयं तदाऽशोका लोकास्त्रिदशपदवीं यान्ति सुभगाम् ॥२६॥ मनः केषां विष्णोर्विमलपदपाथोरुहयुगे समासक्तं केषांचिदपि मनुजानां पशुपतेः। पदद्वन्द्वे मन्देन्दुलसितसुभालस्य मनसो मदीयस्याकाङ्क्षा मृदुपदयुगे सिन्धुनदि ते ॥ २७ ॥ न मे भूभोगेच्छा नच जननि काङ्क्षा श्रुतिश्रुतौ नवा मे पुत्रेच्छाऽमरपदसुखेच्छापि नच मे। नवालीके वर्गे त्वपपदमुखे वाञ्छितमनस्त्वदीयेंऽहोभङ्गे भवति मम गङ्गे पदयुगे ॥ २८ ॥ यया धातुर्लेखो नरशिरसि वैफल्यमगमत् पतन्त्या सोल्लासं जननि सविलासं सुरसरित्। कृपादृष्ट्या सृष्ट्याद्यखिलसुखवृष्ट्या विधिवशाद् विमूढे ह्युन्मत्ते मयि पततु सा दृष्टिरयि ते ॥ २९ ॥ विधाने लोकानां त्रिभुवनगतानां कुशलतां समापन्नो धन्यो जलजनितजन्यो जलधिजा। महौदार्य्यं भार्य्यं परसुकृतकार्य्यं गतवती स ते सिन्धो सेवा सुकृतपरिणामोऽस्ति पदयोः ॥ ३० ॥ सपर्य्यासंसक्तो जननि तव भक्तस्त्रिपथगे वधूर्भिर्देवानां व्रजति निलयं वीजिततनुः। किमित्येतच्चित्रं निजसुकृतकृत्यं तदिह ते महत्त्वं पापौघं यदि सुरसरित्तारयसि माम् ॥ ३१ ॥ सुविख्याताः केचिन्मृदुलतरवाचो हि कवयो हसन्तः साकूतं त्रिदशगतसौभाग्यमपि ते। अनेके सन्त्यस्मिञ्जगति खलु निर्धूतवृजिना यया दृष्ट्या मातर्हरतु मम सा तापपटलीम् ॥ ३२ ॥ सरिद्व्यस्सिन्धो ते क्षितिधरगताभ्यः सदृशता कथं मातर्दीये तनुहरजटाजूटनिलयम्। न तासां काप्येका समुपसरतीन्दीवरपदं मुरारेर्वातस्त्वां तुलयति न कश्चित्कविवरः ॥ ३३ ॥ अनित्यं वा नित्यं जगदिदमशेषं तनुरथो परात्मा वा भिन्नो गुणसहित आहोस्विदगुणः। जडो वा चैतन्यमिति विविधदैन्यं हि मनसो नृणां मातस्तावद्यदवधि न त्वं लोचनगता ॥ ३४ ॥ समुत्प्रेक्षन्ते ये

भवद्वृजिनभङ्गास्तव शिवे तरङ्गा इत्येतत्त्ववितथमहो यत्प्रतिभटैः । कलेराज्ञः सैन्यैर्विजयरवयुक्ताः प्रतिदिनं समुद्युक्ता योद्धुं जगति विजयन्तां हि नितराम् ॥ ३५ ॥ सुधाशौ लांछित्वमुदितमयि सम्भोगजनितं गुरोः पद्म्यास्तातोदधिगतमिदं पङ्कशकलम् । इति प्रोक्तं युक्तं मुनिकविवरैश्शाम्भवशिरोविभूतिप्रक्षालप्रसितमिति काल्यन्त्ववितथम् ॥ ३६ ॥ अवज्ञातः सर्वैर्हरिहरविरंच्यादित्रिदशै रुदन्मातः पार्श्वं तव भजति चानन्यशरणः । मदीयोऽयं जीवो यदि विमुखतां सम्प्रति भजेर्निराधारो भारो भुवि वद व्रजेत्कस्य शरणम् ॥ ३७ ॥ त्वदीयाः सञ्जाता हिमगिरिसमुत्तीर्णसमये सुधाराः सुख्याता भुवि हयमिता भिन्ननिलयाः । ऋते त्वत्षट्संख्याः सरिदधिपतिं गन्तुमबलाः शतद्रादिव्याजाज्जननि मिलितास्ताः पुनरपि ॥ ३८ ॥ स्मरन्तो मुच्यन्ते भवकठिनतापाद्धि मनुजा निमज्जन्तो देवालयमुपसरन्त्यर्चिततमाः । प्रगायन्तो मुक्तिं नच जननि जानेऽर्चनविधेः प्रपद्येरन् किं ते फलमुदितभक्तास्त्रिपथगे ॥ ३९ ॥ अये मातर्गङ्गे हरिरविरतं क्षीरसुनिधौ भुजङ्गस्योत्सङ्गे स्वपिति रमया लालितपदः । तवाश्लेषात्पद्भ्यां जनितदुरितोपक्षयकृते न जानीमो मुक्तः किमवधि भवेत्सिन्धुसुभगे ॥ ४० ॥ समुत्कः पीयूषैः कमलजनितोऽभूत्तुलयितुं त्वदीयाम्भोभारं भवकलुषहारं किल यदा । सुधास्तास्संप्राप्तास्त्रिदशनिलयं वै लघुतया महत्त्वात्त्वज्ज्ञातात्ववनतिमतोऽगाः क्षितितलम् ॥ ४१ ॥ त्वदङ्घ्र्यर्चाचर्चा फलितवरवर्चावरतया न केषां संश्लाघ्या सुरधुनि सुरेशोऽसकृदपि । यतो दण्डाघातादपि समददौवारिककृतात् त्रुटद्भ्रश्यन्मौलिप्रगतमणिरर्चा विधिकृते ॥ ४२ ॥ गुणैर्भागीरथ्या तुलयितुमलं मे मतिरियं यतश्चाक्रे खाते कृतगतिरभूत्सागरशिशोः । पुनाना लोकानां वपुरिनसमानाऽत्र जगति विशिष्टा त्वं सिन्धो सुरसरिदशेषामरनुते ॥ ४३ ॥ तमोवृन्दं भानोः किरणनिचयैर्हीरिव मदान् मनःखेदादामोद इव दलिता भेषजश्रितेः । रुजा नीत्या सत्या विपद इव पादाब्जयुगले त्वदीयेभ्यर्चातो जननि दुरितङ्गच्छति लयम् ॥ ४४ ॥ अये मातर्भूयादघविपिनसम्भ्रान्तमनसां समुद्धारः कस्माद्यदि न तव नीरं विजयते । इदं च ब्रह्माण्डं स्वकृतसुकृतानां फलरसाद्विमुक्तं तत्सङ्गाद्व्रजति सपदि ब्रह्मपदवीम् ॥ ४५ ॥ त्वदीये प्रोत्तुङ्गे सकलजगतामार्तिहरणे प्रवाहे तं पश्यन्मिलति जलधिः सिन्धुभवने । गिरीशो यत्सङ्गान्निखिलसुरसेव्यत्वमगमत्ततस्ते ते देवा अपिच श्रितवन्तोम्बुनिकरम् ॥४६॥ सुधातः स्वादीयस्तव जननि नीरं पिबति

यस्ततश्चान्यो धन्यो नहि भवति लोके जनिभृताम् । परेतः स्वच्छन्दं व्रजति सहसा देवसदनं विधौजस्सारूप्यं भजति सततं नन्दनवने ॥ ४७ ॥ अये मातर्याचे प्रतिदिवसमेव स्वभवने त्वदीये निर्द्धौते तटभवनिकुञ्जे प्रियतमे । शुकः काको भूत्वा तृणमपि च वानीरनिकरो वसामि त्वत्सेवाक्षपितदिवसः सिन्धुसुभगे ॥ ४८ ॥ अये मातर्गङ्गे सुरवरनुते सिन्धुसदने सुनीरे सुश्रीके भगवति भवानीशपतिके । समुच्चार्य्य प्रेम्णा त्यजति यदि कुत्रापि च तनुं श्वपाको वान्योपि भजति जगदीशस्य पदवीम् ॥ ४९ ॥ कृपासारापारा भवमलहरा नैव जननि त्रिलोक्यां त्वत्तुल्या श्रुतिपुटगता नो नयनगा । यतः कुष्ठी पापी सुमतिकुमती वापि च मली त्वदीये श्रीतोये विमलवपुषो यान्ति सुदिवम् ॥ ५० ॥ न मन्त्रं नो यन्त्रं न च जननि जाने स्तुतिपदं न वा विद्या वित्तं तव मुदकरं किञ्चिदपि मे । तथापि त्वत्सेवाविमलवचसां सद्गतिमहं प्रयाचे दीनेऽस्मिन् भवतु करुणा सा निरवधिः ॥ ५१ ॥ कदा मातः सिन्धो तव विमलनीरे विलुठितं शरीरं यादांसि त्वरितमिदमत्स्यन्ति विमलम् । अयं सक्थिग्रन्थिस्त्रुटितशकलः पङ्कनिकरैर्न्निमज्जन्मे भूयादिति तव पुरो रोदिमि सदा ॥ ५२ ॥ स्वभावस्वच्छानां जननि तव वारां हि महिमा जगत्यां गातारं शिशिरयति मोदं च तनुते । अपि प्राजापत्यव्रतजनितचिन्तालसजनान् समुद्धर्त्तुं मातस्त्रिभुवनतले कोपि जयति ॥ ५३ ॥ स्वपंस्तिष्ठन् गच्छंस्त्वयि सुघटितं शोककलुषं सुतं मूढं मां चेत्त्यजसि समयेऽस्मिन् सुविषमे । त्वदीया निर्व्याजा करुणसरणिर्ध्वस्तिमयते निरालम्बोऽहं वो वद जननि कं यामि शरणम् ॥ ५४ ॥ सुविद्यास्ते देवान्कठिनतरसेवान्सुविमलैः स्तवैर्मन्त्रैर्ध्यात्वा कतिचिदपि योगेन तरिताः । अहं तु त्वन्नामस्मरणजनिताखर्वसुमदो जगज्जालं जाने जननि तृणजालेन सदृशम् ॥ ५५ ॥ सुपुष्पैः सौरभ्याभरितमधुपा ये पुनरिमे कदम्बाद्या वृक्षास्तव तटरुहा देवि नितराम् । तपः कृत्वा तीव्रं सुरपुरतरूणां सुरसरिन्महत्साम्यं लब्ध्वा दधति नियतं ब्रह्मपदवीम् ॥ ५६ ॥ शरज्ज्योत्स्नाकारां निटिलतटचन्द्रद्युतिमुखां करैः कुम्भाम्भोजे वरभयनिरासौ च दधतीम् । सुमुक्ताताटङ्कैर्लसदमलचीनांशुमकरां स्मितां ये त्वां ध्यायन्त्युदयति न तेषां परिभवः ॥ ५७ ॥ अनेके ते मार्गा जगति भवनाशाय सुलभा मया सर्वे त्यक्ताश्चलितमनसाऽदृष्टविषयाः । न कुर्य्यास्त्वं हेलामितरजनसाधारणतया त्वदाराध्यस्यायं सुरधुनि समुद्धारसमयः ॥ ५८ ॥ शठा मां निन्दन्तु त्यजतु यदि लोके सुज-

नता हसन्तु श्रीरङ्गा लसतु च मनोज्ञापि युवतिः । तथापि त्वत्तीरे जननि विलुठन्नञ्जलिजलं पिबन्ध्यायन् स्वान्तस्तव पदयुगान्नैव विरमेत् ॥ ५९ ॥ स्वकीयं निर्माल्यं हिमगिरिसुतेशस्य च सदा परित्याज्यं सर्वैर्निजचरणशौचाम्बुबपि तथा। जले ते तादृक्षेऽपरसुरकथैवाम्ब विफलाऽमुनार्चाभिस्तुष्टौ चरमफलदौ यद्धरिहरौ ॥ ६० ॥ हरप्रेमोदन्वत्यतिशयितभक्तो हरिरहो निमग्नो नावैति स्वपदजमिदं वा पशुपतेः । इतीदं निर्माल्यं परमिदमघौघस्य हरणं हराराध्यं मत्वा स्वयमपि तदर्चां प्रकुरुते ॥ ६१ ॥ स्मरारिस्त्वां धत्ते हरिचरणशौचाम्बुजनितां शिरोदेशे मातर्हरिहरतनू स्नातरि जने । यतस्त्वं सन्दत्सेऽमृतमयजले तज्जलरुचेर्न भक्त्या वा विष्णोरिति मम मनोऽवैति नियमैः ॥६२॥ असौ धन्यो देशोऽमृतमयजला यत्र लहरी त्वदीया भूतानां वृजिनवनदाहेऽग्निसदृशीम् । क्रियां चित्रं माता रचयति विना वह्निकणिकामपूते सा चित्रं भवति च सदा पावकतनूः ॥ ६३ ॥ सती पत्नी सिद्धिस्सुतवरवधूर्ज्ञानिषु वरो मनू रामाभिख्यो दिशति यमसौ तारणविधौ । भवाब्धेर्विश्वेशो निवसति सदानन्दसुवने तथापि त्वामुज्झत्यखिलफलमूलं न शिरसः ॥ ६४ ॥ प्रवाहोऽगात्सिन्धौ यदवधि ततस्सिन्धुपदभागभूश्चित्रं मातर्हरशिरसि वासान्नु हरता । तवाभूत्तच्चित्रादतिशयितचित्रं तु हरता त्वदम्बुस्नातॄणां विगतवपुषां यच्च नियता ॥ ६५ ॥ त्वदीयं सत्पाथो विरचयति बाह्यान्तरशुचि स्वयं निम्नं गच्छद्गमयति परानुच्चशिखरम् । अतिस्वच्छं पीतं भवति यदि कैश्चित्सुरनुते तदा तेभ्यः पीताम्बरतनुमहो यच्छति पराम् ॥ ६६ ॥ जनास्त्वां निन्दन्ति त्वदमलयशोरागरहिताः पुमर्थानां दात्रीं सुलभसलिलैः सिन्धुमहिलाम् । मदान्धास्त्वन्नामस्मरणनिहताशेषकलुषा लभन्ते स्वस्तेऽपि प्रचुरकृपया तेऽम्ब रिपवः ॥ ६७ ॥ महेशाह्वा शम्भोरमरगुरुता बोधनकरी मुरारेः श्रीशाह्वाप्यमितविभवं तम्प्रथयति । विनाऽक्षीणैः पुण्यैः सुघटितयथार्था किमु तयोर्भवेदाह्वा तस्मात् सुकृततये तत्र लससि ॥ ६८ ॥ जनश्छिद्रान्वेषी भवति यदि पापी स गणितः परच्छिद्रान्वेषस्तव तु सततं तत्क्षयमतेः । न जातु त्वं पापा नच तव नृशंसेऽनु गणना न जाने तन्मातर्भवति न गुरोर्दोषगणना ॥ ६९ ॥ वस स्वःपातालेऽप्यथ मनुजलोकेऽमरगवी प्रसिद्धा त्वं मातर्वितरसि मनोऽभीष्टमनिशम् । स्थितायां श्रीमत्यां त्रिपथगतिमत्यां त्रिपथगा हरिब्रह्मेशाना अपि न विमताः क्वापि विषये ॥ ७० ॥ नरो वा नारी वा जननि कुरुतात्पापमखिलं शठत्वं वा

...वधे सुरार्चापरजने । विधत्ताद्विज्ञानाद्विरतिमपि हानिर्नहि ततस्त्वदीयः संसर्गः कथमपि यदि ब्रह्मफलदः ॥ ७१ ॥ विधात्री कामानामतिमहिततीर्थाधिपगता—त्रिवेणीस्नातृणां विगतवपुषां चातिमहिता । सरिच्छ्रेष्ठे सिन्धुप्रणयिनि सदा गाङ्गलहरी—विमिश्रा तद्गङ्गापदमिह महत्त्वाय भुवने ॥ ७२ ॥ लभन्तां विष्णुत्वं द्रुहिणपदवीं वापि हरतां—परब्रह्मत्वं वा जननि किल भूतानि दयया । तवाहो माहात्म्यं कथमपि न वेत्तुं तु निपुणा—भवन्ति श्रीमत्या भगवति भवत्या अतिगुणे ॥ ७३ ॥ प्रवेष्टुर्लोकस्य त्वमसि पदनिम्ने स्थितिमती तथा तस्य स्नातुः शिरसि किल धारां वितनुषे । प्रयातुः स्वावासं तत उदकरूपैषि विमले—सुपात्रे विष्णवीशाब्जकृतिकरं तं प्रकुरुषे ॥७४॥ पृथिव्यां त्वन्निम्ने प्रवहसि सदा पूर्णकरुणा—निमग्नानां निम्ने महति वृजिनोदन्वति नृणाम् । महोदारोद्धारं मनसि विनिधायामरनुते—हठादुच्चस्थानं नयसि सुरसेव्यं पुनरितः ॥ ७५ ॥ वियत्तारासंख्यागणितकुशलानां मतिगता—भवेत्संख्यारेणोरपि कथमपि श्लाघ्यसुमते । त्वदम्भोनष्टांहोहरिहरपदावाप्तिभजतां—न संख्याने शक्ताः कथमपिनरा वापि च सुराः ॥ ७६ ॥ हरिर्ब्रह्मा शम्भुः पुनरपि न देवास्तदितरे—दृशा दृष्टाः केषामपि विकलचित्तेन भजताम् । दयार्द्रा त्वं मातः सकलजनतासंमुखगता—सदाभिक्षां दत्से किमु नहि वरा तावकदया ॥ ७७ ॥ वियद्व्योमाकाशाम्बरगगनवेदाष्टकमिते—मुहुर्योनौ यन्त्रे जननपरिपाटी तदवधिः । न यावत्संसर्गं भजति तव मातस्सुरसरि—त्त्वया दग्धे बीजे क्षितितलजनेः क्वांकुरजनिः ॥ ७८ ॥ तरङ्गाणां रावैरमरगवि ये नारकजना—विमुक्तिं सञ्जाता निहतकलुषास्त्वत्स्मृतिवशात् । अभूवन्नीरावा अपिच निरयाः शून्यभवना—बभौ दोषैः शून्यं यमनिकटगं पुस्तकमपि ॥ ७९ ॥ मणिद्वीपाधीशा प्रकृतिपरमा दिक्परिमिता—महाविद्यानाम्नीरजनयत देवीः सुकलया । जगत्रातुं दातुं निजनिजसुभक्ते-प्रियवरान्—जगत्राणाद्दानादपि हससि फेनैः किमिह ताः ॥ ८० ॥ क्वचिद्देशे गङ्गासगरकुलजोद्धारकुशला—सरय्वाथो नाम्नाप्यवधपुरगा त्वं प्रवहसि । क्वचित्सिन्धुः क्वापि प्रवहसि परैर्नामशतकै—र्विचारे गङ्गैका जगति जगदम्बा प्रवहसि ॥ ८१ ॥ चिताभूमौ वासो गरलमशनायापि वसनात् सदा हीनो देहः स्वगपि शवमुण्डैःसुरनदि । विधौ धत्ते मूर्द्धन्यभवदमनोज्ञं तदपि यच्छिवेशत्वं शम्भोः शिरसि तव संचारमहेमा ॥ ८२ ॥ न वृद्धिर्भालेत्दोर्नच सरलता सिन्धुसुभगे न नेत्राग्नेर्ज्वाला क्वचिदपि शमं याति

समये । महेशाङ्गश्रेष्ठोपरिनिवसतिं वीक्ष्य गतयोरुषं रुष्टा नत्वं तदा यच्छ मावाश्रितिमितौ ॥ ८३ ॥ जगन्मातः सिन्धुप्रणयिनि सुधावारिभि जटा-जूटे स्थित्वा हरतनुगतेऽहेर्विषमताम् । सुधासेकैर्हृत्वा वित शमं न सह ते धराभारं शश्वद्भवति भुवने चैव सुयशाः ॥ ८४ ॥ सुतो ज्येष्ठो गेदरत-नुरथास्येन च करी परो वक्त्रैः षड्भिर्विलसिततनुः पर्वतसुता । प्रि दर्वी वितरति सदान्नं च तदपि महेशत्वं भिक्षोस्तव धृतिवशाद्बिभ्रि नते ॥ ८५ ॥ सदाशूली भुङ्क्ते विषमविषधत्तूरविजया अपि प्रेतैस्साकं विहरति चितायाम-मृतवाः । अये जित्वा मृत्युं निजमथ च भक्तस्य भजते महादेवो मृत्युञ्जयप-दमिदं त्वद्धृतिफलम् ॥ ८६ ॥ विभूषा मुण्डानां शुचिविरहभाजां च फणि ना विषाक्तानां धत्ते शवदहनभस्मावृततनुः । तथाप्यास्ते पूतः प पुनीते विषमदृक् शुचीनां ते मातुः किल धृतिवशात् सौम्यसलिले ॥ ८७ ॥ विरक्तः सद्भोगादकृतगरलाशं पुनरसौ पुरं त्यक्त्वा वात्सीदचलशिखरे योगसुमनाः । वितृष्णः स्त्रीभोगेऽदहदपि सकामं च सरसे भवानीमर्द्धाङ्गेऽधृत तवधृतेरेव महिमा ॥ ८८ ॥ हरेः पादाम्भोजाद्रसमयतनूरम्ब समभूः समारूढा गाद्गिरिश-परमोच्चैः स्थलवरम् । परागात्मा नाभूर्नच शिवशिरोऽधःप्रपतिता व्यनक्तीयं सृष्टिर्हरिचरणसंसर्गसुफलम् ॥ ८९ ॥ सदा शिक्षां दत्से शिवशिरसि सेतूपमजटा-वरुद्धा सुस्निग्धा रसमयतनूश्चापि सकले । समाजे नारीणां परमचतुरे साधुसु ता रसाधाने प्रेम्णेतरगतिनिरोधे च यतताम् ॥ ९० ॥ अघाटव्या दावः पुनरधवत तापशमनी प्रिया सिन्धोः पुण्यप्रजननिदानं सुरसरित् । मुमुक्षूणां मुक्त्यै परम-करुणोद्योगचतुरा भवघ्नी त्वं मातर्भवशिरसि चित्रं विलससि ॥ ९१ ॥ कृतघ्न-स्त्वद्भक्त्या बत भवति जन्तुर्जननि तत् कथं मज्जन्विष्णुर्भवति गतदेहोऽप्यथ शिवः । महापुण्यैर्लभ्यो हरिहरसुभक्तैर्गतवति तयोः सङ्गाद्दृष्टा रचयसि तदा-नन्त्यमिह किम् ॥ ९२ ॥ हरेः पादाधःस्था ह्यमृतविभवारब्धिसुभगा भवान्या अप्येषा महितमहिमा शम्भुशिरसि । जटायां खेलन्ती भवसि जगदानन्दजननी महोदारा पाराङ्गनयसि पुनः सिन्धुलहरीम् ॥ ९३ ॥ हिमानीस्थाणूनां हरति सु-खमां तज्जनकजा मृडानीयं स्थाणोरतिशयितशोभां वितनुते । भवान्या वा स्थाणो-र्नहि कुशलता कारणमिह सुधाम्भःसंसेकादमरगवि सानन्दलहरी ॥ ९४ ॥ वृषः पत्रं शम्भोरथ गिरिसुताया मृगपतिर्मयूरोथो मूखो वहनकुशलौ तत्तनययोः । विरुद्धानामेषां सुरधुनि समानाधिकरणो निवासः कैलासे तव समदृशः